www.shaivam.org

Various hymns on Lord shrI daxiNAmUrti

મૌનવ્યાખ્યાપ્રકટિતપરબ્રહ્મતત્ત્વં યુવાનં
વર્ષિષ્ટાન્તે વસદૃષિગણૈરાવૃતં બ્રહ્મનિષ્ઠૈઃ ।
આચાર્યેન્દ્રં કરકલિતચિન્મુદ્રમાનન્દરૂપં
સ્વાત્મારામં મુદિતવદનં દક્ષિણામૂર્તિમીડે ।।
વટવિટપિસમીપે ભૂમિભાગે નિષણ્ણં
સકલમુનિજનાનાં જ્ઞાનદાતારમારાત ।
ત્રિભુવનગુરુમીશં દક્ષિણામૂર્તિદેવં
જનનમરણદુઃખચ્છેદદક્ષં નમામિ ।।
ચિત્રં વટતરોર્મૂલે વૃદ્ધાઃ શિષ્યા ગુરુર્યુવા ।
ગુરોસ્તુ મૌનં વ્યાખ્યાનં શિષ્યાસ્તુ છિન્નસંશયાઃ ।।
નિધયે સર્વવિદ્યાનાં ભિષજે ભવરોગિણામ ।
ગુરવે સર્વલોકાનાં દક્ષિણામૂર્તયે નમઃ ।।
ૐ નમઃ પ્રણવાર્થાય શુદ્ધજ્ઞાનૈકમૂર્તયે ।
નિર્મલાય પ્રશાન્તાય દક્ષિણામૂર્તયે નમઃ ।।

www.shaivam.org